**आदर्शप्रश्नपत्रम्**

**द्वितीयसत्रम् (2021-22)**

**कक्षा – द्वादशी**

**संस्कृतम् (ऐच्छिकम्) (कोड सं.-022)**

**समयः – होराद्वयम्** **अङ्कयोजना** **पूर्णाङ्काः – 40**

**अवधातव्यम् –**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।**
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि–शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक् प्रश्ननिर्माणं स्यात् <u>तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः</u>।**

## वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –** | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) अभिनन्दितवान्<br>(ii) सर्वेषाम्<br>(iii) नौकायाम् | |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) बाला अल्पे एव वयसि विविधासु विद्यासु पारङ्गता चतुरमतिः धैर्यशालिनी च आसीत्।<br>(ii) तौ रक्षणीयौ एव इति सङ्कल्प्य सा जले कूर्दितवती, मीनः इव च तरन्ती सा तयोः हस्तौ दृढतया गृहीत्वा नौकां प्रति आनीतवती।<br>(iii) यदा नौका नद्याः मध्यभागम् आगता तदा तस्याः नद्याः अपरस्मात् भागात् भीत्या त्वरया च जले तरन्तौ आगच्छन्तौ कौचित् दृष्टौ। | |
| | **(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** | 1×1=1 |
| | धैर्यशालिनी बाला, साहसिनी बाला, दयार्द्रहृदया बाला<br>अथवा अन्यत् किमपि उचितं शीर्षकम्<br>**छात्रैः लिखितानि पदानि दृष्ट्वा शुद्धाशुद्धनिर्णयः छात्रहिताय कर्तव्यः।** | |
| | **(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** | 1×3=3 |
| | (i) सङ्कल्प्य<br>(ii) बालायाः<br>(iii) भीत्याः<br>(iv) सा | |
| | **रचनात्मककार्यम्** | |
| 2. | छात्राः संस्कृतभाषया सूचनां लेखिष्यन्ति।विषयप्रतिपादनार्थं 2½ अङ्काः, वाक्यशुद्ध्यर्थं च 2½ अङ्काः प्रदेयाः।<br>**अथवा**<br>चित्रादिरचनामाध्यमेन छात्राः विज्ञापनं रचयेयुः। विषयप्रतिपादनार्थं 2½ अङ्काः, वाक्यशुद्ध्यर्थं च 2½ अङ्काः प्रदेयाः। | 1×5=5 |
| | | |
| 3. | प्रदत्तविषयमधिकृत्य तथ्यानां सहायतया स्वविवेकानुसारं संस्कृतेन लिखिते अनुच्छेदे विषयप्रतिपादनार्थं 2½ अङ्काः, वाक्यशुद्ध्यर्थं च 2½ अङ्काः प्रदातव्याः। | 5 |

| | | |
|---|---|---|
| | | |
| 4. | **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –**<br>1. वाटिकायां सुगन्धितानि पुष्पाणि विकसन्ति।<br>2. बालकाः क्रीडाक्षेत्रे अक्रीडन्।<br>3. वयं श्वः विद्यालये वृक्षारोपणं करिष्यामः।<br>4. सर्वे छात्राः संस्कृतं पठेयुः।/ सर्वैः छात्रैः संस्कृतं पठनीयम्।<br>5. यूयं सुखिनः भवत।<br>6. शिष्याः गुरवे निवेदयन्ति।<br>7. राजानम् उभयतः सैनिकाः अचलन्। | 1×5=5 |
| | **पठितावबोधनम्** | |
| 5. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) मानववार्ता<br>(ii) मानवाः<br>(iii) अश्वत्थदेवस्य<br>**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) जीवसृष्टिप्रवाहेषु मानवाः पर–प्रतारकाः स्वार्थसाधनपरा मायाविनः कपटव्यवहारकुशलाः हिंसानिरताः जीवाः सन्ति।<br>(ii) अश्वत्थदेवः सर्वविधविटपिनां मध्यभागे स्थितः अस्ति।<br>(iii) महापादपाः वनस्पतिकुलप्रदीपाः सन्ति। | 3<br>½×2=1<br><br><br><br>1×2=2 |
| | | |
| 6. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) इन्दुः<br>(ii) पद्मस्य<br>(iii) गगने<br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) चन्द्रः कुमुदात् द्विलक्षं दूरं तिष्ठति।<br>(ii) कलापिनः मित्रं पयोदः अस्ति।<br>(iii) पद्मं अर्कं/ सूर्यं दृष्ट्वा विकसति। | 3<br>½×2=1<br><br><br><br>1×2=2 |
| 7. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 3<br>½×2=1 |

| | | |
|---|---|---|
| | (i) 'आचार्य' इति<br>(ii) कक्षायाम्<br>(iii) समुत्सुकाः<br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) छात्राः योगस्य अभ्यासेन स्वाध्यायेऽपि एकाग्रतां वर्धयितुं सक्षमाः भविष्यन्ति।<br>(ii) छात्राः योगस्य उपयोगितायाः विषये सम्यग्रूपेण ज्ञातुं समुत्सुकाः आसन्।<br>(iii) योगशास्त्रे शरीरस्य मनसः च नियमनं प्रतिपादितम् अस्ति। | 1×2=2 |
| | | |
| 8. | **अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत –**<br>**भावार्थः** – संसारे ये केचन कर्तव्यपरायणाः जनाः सन्ति ते (i) **विषमपरिस्थितौ** अपि स्वनिर्धारितं कार्यं पूरयन्ति।तेषां मार्गे कियन्तोऽपि विघ्नाः आगच्छेयुः ते (ii) **स्वकार्यात्** कदापि न विरमन्ति।तादृशाः कर्तव्यनिष्ठमहापुरुषाः (iii) **स्वप्राणानाम्** अपि मोहं न कुर्वन्ति।<br>**अथवा**<br>**भावार्थः** – अत्र सायङ्कालीनं (i) **प्राकृतिकं** सौन्दर्यं वर्णितम् अस्ति। यदा सूर्यः अस्तं गच्छति तदा पश्चिमदिक् रक्तवर्णैः मेघैः (ii) **आच्छादिता** भवति। तद् दृश्यं दृष्ट्वा प्रतीयते यत् मेघाः सिन्दूरमये जले स्नात्वा आगताः सन्ति। तादृशेषु रक्तवर्णीयेषु मेघेषु (iii) **सूर्यः** अस्तं गच्छति। | 1×3=3 |
| | | |
| 9. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)**<br>**अन्वयः** – धनविषये (i) **सञ्चयः** न कर्तव्यः(धनं) दातव्यं भोक्तव्यं (वा)। इह (ii) **पश्य** मधुकरीणां सञ्चितम् (iii) **अर्थम्** अन्ये हरन्ति।<br>**अथवा**<br>**अन्वयः** – ददाति प्रतिगृह्णाति (i) **गुह्यम्** आख्याति पृच्छति (ii) **भुङ्क्ते** भोजयते च एव प्रीतिलक्षणं (iii) **षड्विधं** (भवति)। | 1×3=3 |

*****************************